# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- शास्त्री (SEM-5) | **प्रश्नपत्रम्**-६ (New & Old) | **गुणाः** - ७० |
| **विषयः** - पुराणेतिहासः | **कोड**- CC- 3-5-10 | **समयः** - १० तः १ |
| **दिनाङ्कः** - १०/१२/२०१८ | **सन्दर्भग्रन्थः**- महाभारते भीष्मपर्वणि गीतापर्व १३-४२ अध्यायाः | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ श्लोकद्वयं सप्रसङ्गं व्याख्यायताम् ।** **१०**

१. महेन्द्रसदृशः शौर्यं स्थैर्यं च हिमवानिव ।
समुद्र इव गाम्भीर्ये सहिष्णुत्वे धरासमः ॥

२. अनन्तरूपा ध्वजीनी नरेन्द्र भीमा त्वदीया न तु पाण्डवानाम् ।
तां चैव मन्ये बृहतीं दुष्प्रघर्मां यस्या नेता केशवश्चार्जुनश्च ॥

३. यत्र धर्मो द्युतिः कान्तिर्यत्रः ह्रीः श्रीस्तथा मतिः ।
यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः ॥

**प्र-२ कस्याप्येकस्योत्तरं विस्तारेण ददातु ।** **१०**

१. दुर्योधनसेनावर्णनम् ।

२. युधिष्ठिराय अर्जुनस्य आश्वासनवचांसि ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ श्लोकद्वयं सप्रसङ्गं व्याख्यायताम् ।** **१०**

१. धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत संजय ॥

२. कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहितन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥

३. प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥

**प्र-४ कस्याप्येकस्योत्तरं विस्तारेण ददातु ।** **१०**

१. स्थितप्रज्ञस्य भाषा ।

२. आत्मतत्त्वम् ।

॥ तृतीयान्वितिः ॥

**प्र-५ श्लोकद्वयं सप्रसङ्गं व्याख्यायताम् ।** **१०**

१. सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥

२. अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥

३. अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलालुप्त्वं मार्दवं ह्रीरचापलम् ॥

**प्र-६ यथाग्रन्थं साधु वर्णयत ।** **१०**

१. भक्तियोगः ।

२. पुरुषोत्तमयोगः ।

॥ चतुर्थान्वितिः ॥

**प्र-७ दशानां लघूत्तराणि लिखत ।** **१०**

१. भारतं कतमो वेदः ?

२. गेयं गीतानाम सहस्रम् कस्योक्तिः ?

३. कः शान्तवः (शान्तनुपुत्रः)?

४. कीदृशं सिंहं वृको हन्यात्?

५. पाञ्चजन्यः कस्य देवस्य शङ्खः ?

६. कस्य पितरः नरके पतन्ति?

७. अशान्तस्य किं नास्ति?

८. कस्मात् पर्जन्यो भवति?

९. किं श्रेयः किं भयावहः ?

१०. महाभारते कति पर्वाणि?

११. कस्य संस्थापनाय ईश्वर अवतरति?

१२. कः ज्ञानं लभते?

१३. पण्डिताः कीदृशाः?

१४. इदं शरीरं किमभिधीयते?

१५. महाभारतं केन प्रणीतम्?

--००--